श्री विष्णु द्वादशनाम पंजर स्तोत्रं

श्री विष्णु द्वादशनाम पंजर स्तोत्रं

पुरस्तात् केशवः पातु चक्री जांबूनदप्रभः |
पश्चान्नारायणः शंखी नीलजीमूतसन्निभः || 1 ||

इंदीवरदलश्यामो माधवोर्ध्वं गदाधरः |
गोविंदो दक्षिणे पार्श्वे धन्वी चंद्रप्रभो महान् || 2 ||

उत्तरे हलभृद्विष्णुः पद्मकिंजल्कसन्निभः |
आग्नेय्यामरविंदाभो मुसली मधुसूदनः || 3 ||

त्रिविक्रमः खड्गपाणिर्निर्ऋत्यां ज्वलनप्रभः |
वायव्यां वामनो वज्री तरुणादित्यदीप्तिमान् || 4 ||

ऐशान्यां पुंडरीकाभः श्रीधरः पट्टसायुधः |
विद्युत्प्रभो हृषीकेशो ह्यवाच्यां दिशि मुद्गरी || 5 ||

हृत्पद्मे पद्मनाभो मे सहस्रार्कसमप्रभः |
सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः || 6 ||

इंद्रगोपकसंकाशः पाशहस्तोऽपराजितः |
स बाह्याभ्यंतरं देहं व्याप्य दामोदरः स्थितः || 7 ||

एवं सर्वत्रमच्छिद्रं नामद्वादशपंजरं |
प्रविष्टोऽहं न मे किंचिद्भयमस्ति कदाचन || 8 ||

भयं नास्ति कदाचन ॐ नम इति ||

इति श्री विष्णु द्वादशनाम पंजर स्तोत्रं ||